इति रामायणे बालकाण्डे ७० सर्गः ॥ सूर्य्यवंशी-
यासमञ्जोराजपौत्रः । यथा,—
"ततश्चकारासमञ्जा गङ्गानयनकारणं ।
लक्षवर्षं तपस्तप्त्वा ममार कालयोगतः ॥
दिलीपस्तस्य तनयो गङ्गानयनकारणं ।
तपः कृत्वा लक्षवर्षं ययौ लोकान्तरं नृपः ॥
अंशुमांस्तस्य पुत्त्रोऽभूद्गङ्गानयनकारणं ।
तपः कृत्वा लक्षवर्षं ममार कालयोगतः ॥
भगीरथस्तस्य पुत्त्रो महाभागवतः सुधीः ।
तपः कृत्वा लक्षवर्षं ममार कालयोगतः" ॥
इत्यादि ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः ॥
(विश्वव्यापिप्रकाशः परमात्मा ।) अंशुयुक्ते त्रि ॥
सोमलताया अवयवविशिष्टः ।)

अंशुमाली, [न्] पुं, (अंशूनां माला अस्ति अस्य इति । व्रीह्यादित्वात् इनिः ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (आदित्य इवांशुमाली चचार, इति विष्णुपुराणम् ।)

अंशुलः, पुं, (अंशुः विद्याज्योतिः अस्ति अस्य । इति । अंशु + लच् ।) चाणक्यमुनिः । इति त्रिकाण्डशेषः ॥

अंशुहस्तः, पुं, (अंशुरेव हस्तः यस्य सः ।) सूर्य्यः । इति जटाधरः ॥

अंस, त् क विभाजने । अंशकरणे । इति कविकल्पद्रुमः ॥ दन्त्योपधः । विभाजन इति भाज त् क तु पृथक्कृत्यां इत्यस्य रूपं । अंसयति अंसापयति धनं वणिक् । इति दुर्गादासः ॥

अंसः, पुं, क्ली, (अंस्यते समाहन्यते । अंस समाघाते । घञ् । यद्वा अमति अम्यते वा भारादिना । अम गतौ । अमेः सन् ।) स्कन्धः । इत्यमरः ॥ विभागे पुं । इति विश्वो हेमचन्द्रश्च ॥ (अन्यत् सर्व्वम् अंशशब्दे द्रष्टव्यम् ।)

अंसकूटः पुं, (अंसे स्कन्धे कूट इव इति ।) ककुद् । षाँड़ेर झूँट इति भाषा । इति हेमचन्द्रः ॥

अंसलः, त्रि, (अंसोऽस्यास्तीति । वत्सांसाभ्यां कामबले इति लच् ।) बलवान् । इत्यमरः ॥

अंहः, [स्] क्ली, (अमति गच्छति प्रायश्चित्तादिना । अम गत्यादिषु । अमेः हुक् च इति असुन् हुगागमश्च । अमति गच्छति अधोऽनेन वा । अंहेरसुना सिद्धे अमेरसुनि हुक् इति मा भूदिति अमेः हुक् चेति सूत्रं । तथा च—
"सान्मधोत्रापतुर्थलमंहसोरंहसस्तथा" ।
इति द्विरूपकोषः । एवञ्च 'दत्तार्धाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमंहोविघातम्' इति सूर्य्यशतके पाठः अनुप्रासरसिकानां प्रामादिक इति वदन्ति ।) पापं । इत्यमरः । (दुःखं । विघ्नः । स्वधर्म्मत्यागः ।)

अंहतिः, स्त्री, (हन्ति दुरितमनया । हन्तेरंह च इति अतिः ।) दानं । इत्यमरः ॥ रोगः ॥ त्यागः । इति मेदिनी ॥

अंहती, स्त्री, (हन्तेरंह च इति अतिः, बह्वादित्वात् ङीष् ।) दानं । इत्यमरटीकासारसुन्दरी ॥

अंहितिः, स्त्री, (अंह्‌न् + अतिः । अंहादेशः इडागमश्च ।) दानं । इत्यमरटीकायां रायमुकुटः ॥

अंह्रिः, पुं, (अहि + क्रिन् । वंक्रादयश्च इति उणादिसूत्रम् ।) पादः ॥ वृक्षमूलं । इत्यमरः ॥

अंह्रिपः, पुं, (अंह्रिभिः पिबति इति । पा पाने । सुपीति योगविभागात् कः । वृक्षः । इति हलायुधः ॥

अंह्रिस्कन्धः, पुं, (अंह्रिः पादः । तस्य स्कन्ध इव ।) गुल्फः । (कुर्च्चशिरः ।) इति हेमचन्द्रः ॥

अक, म वक्रगतौ । कुटिलगमने । इति कविकल्पद्रुमः ॥ म अकयति अकति सर्पः । इति दुर्गादासः ॥

अक, इ क लक्षणि । इति कविकल्पद्रुमः । लक्ष्म चिह्नयुक्तकरणं । इ क अङ्कयति वस्त्रं रजकः । नोपधपाठेऽपि णेर्नित्यत्वाद्दसुङ्नलोपोऽनाविर्भ्यस्याप्राप्तौ यगादौ अङ्क्यते इत्यादौ सिद्धे इदित् पाठस्वरादेर्णेरनित्यत्वज्ञापनार्थः । तेन अङ्कतीत्यपि स्यात् । तथाच वोपदेवः ।
"सिद्धे नित्यणिजन्तत्वान्नित्यनुत्वे कितामिदित् ।
निजनित्यत्वबोधार्थं न दृष्टोऽनुम्विधिः क्वचिदिति" ॥
अस्यार्थः । कितां कानुबन्धानां नित्यणिजन्तत्वान्नित्यञ्चान्तत्वान्नित्यनुत्वे नित्यनकारवत्त्वे सिद्धे इदित् इदनुबन्धकरणं णिचो णेरनित्यत्वबोधार्थं । किन्तु अनुम्विधिर्नकाराभावः क्वचिदपि न दृष्टः । इति दुर्गादासः ॥

अक, इ ड गतौ । लक्षणि । इति कविकल्पद्रुमः ॥ इ अङ्कते । ड अङ्क्ते पुण्यतीर्थेषु वृषयुग्मान्यश्रज्ञितः । इति हलायुधः ॥ इति दुर्गादासः ॥

अकं, क्ली, (न कं सुखं । तद्विरुद्धं वा । नञ्समासः । नञः न लोपः ।) पापं । दुःखं । इति मेदिनी ॥

अकचः, पुं, (नास्ति कचः केशः यस्य सः ।) केतुग्रहः । इति हारावली ॥ वाच्यलिङ्गस्तु केशशून्ये ।

अकथ्यः, त्रि, न कथ्यः । नञ्समासः ।) अकथनीयः । अवक्तव्यः ॥

अकनिष्ठः, पुं, (न कनिष्ठः नञ्समासः । बुद्धः । इति शब्दरत्नावली ॥ (बहूनि शतसहस्राणि यावदकनिष्ठानां देवानां सन्निपतितान्यभूवन् इति ललितविस्तरः ।) कनिष्ठभिन्ने वाच्यलिङ्गः ॥

अकनिष्ठगः, पुं, (अकनिष्ठ + गम् + डः ।) बुद्धः । इति त्रिकाण्डशेषः ॥

अकम्पितः, पुं, (न कम्पितः । नञ्समासः ।) बौद्धगणाधिपविशेषः । इति हेमचन्द्रः ॥ कम्परहिते वाच्यलिङ्गः ॥ (असंदिग्धान् स्वरान् ब्रूयादविलम्बितानकम्पितान् । इति ऋग्वेदीयप्रातिशाख्यवचनम् ।)

अकरणिः, स्त्री, (न + कृञ् अनि ।) आक्रोशविशेषः । शापः । यथा तस्याकरणिरेवास्तु । इत्यमरः ॥

अकरा, स्त्री, (न + कृञ् + अच् । स्त्रियां ङीप् ।) आमलकी । इति शब्दचन्द्रिका ॥ वाच्यलिङ्गस्तु कररहिते ॥

अकरुणः, त्रि, (नास्ति करुणा यस्य इति ।) करुणाशून्यः । निर्दयः । अकृपः । यथा,—
"रघोर्वंशे कुलामकरुणया समुत्सारयति कः" ।
इति महानाटकं ॥

अकर्कशः, त्रि, (न कर्कशः । नञ्समासः ।) कार्कश्यरहितः । कोमलः । इति हेमचन्द्रः । (अकर्कशा अपरुषा । इति ललितविस्तरः ।)

अकर्णः, त्रि, (नास्ति कर्णौ यस्य सः ।) कर्णरहितः । यथा,—
"अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः" ।
इति श्रीधरस्वामिकृतश्रुतिः ।) बधिरः । इति हेमचन्द्रः ॥

अकर्त्तनः, पुं, (न + कृत् + ल्युट् ।) वामनः । खर्व्वः । इति जटाधरः ॥

अकर्त्तव्यं, त्रि, (न + कृञ् + तव्य । न कर्त्तव्यं । नञ्समासः ।) अकरणीयं । अकरणार्हं । अकार्य्यं । यथा,—
"अविरोधी भवाब्धौ च सर्व्वमङ्गलमङ्गलं ।
विरोधी नाशबीजञ्च सर्व्वोपद्रवकारणं ॥
अकर्त्तव्यो विरोधश्च दारुणैः क्षत्त्रियैः रुह" ।
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २८ अध्यायः ॥

अकर्त्ता, [ऋ] त्रि, (न कर्त्ता । नञ्समासः ।) अकारकः । यथा,—
"चातुर्व्वर्ण्यं मया सृष्टं गुणकर्म्मविभागशः ।
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययं" ॥
इति श्रीभगवद्गीतायां ४ अध्याये १३ श्लोकः ॥
(कर्म्मनिर्लिप्तः साङ्ख्योक्तः पुरुषः । कुकर्म्मकारी ।)

अकर्म्म, [न्] क्ली, (न कर्म्म । नञ्समासः ।) अकरणीयकार्य्यं । यथा,—
"किं कर्म्म किमकर्म्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥
कर्म्मणो ह्यपि बोद्धव्यं बोद्धव्यञ्च विकर्म्मणः ।
अकर्म्मणश्च बोद्धव्यं गहना कर्म्मणो गतिः ॥
कर्म्मण्यकर्म्म यः पश्येदकर्म्मणि च कर्म्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्म्मकृत्" ॥
इति श्रीभगवद्गीतायां ४ अध्याये १६ । १७ । १८ श्लोकाः ॥ (अप्रशस्तं कर्म्म । कर्म्माभावः । दुष्कर्म्म ।)

अकर्म्मण्यं, त्रि, (न कर्म्मणि साधुः । न + कर्म्मन् + यत् । कर्म्मायोग्यं । कार्य्यानर्हं । निष्कर्म्मण्यं । अकेजुया इति भाषा । यथा,—
"षड्विंशहात्मिकायाश्च तिथेर्निष्क्रमणे परे
अकर्म्मण्यं तिथिमणं विद्यादेकादशीं विना" ॥
इति तिथ्यादितत्त्वं ॥

अकर्म्मा, [न्] त्रि, (नास्ति कर्म्म यस्य । बहुव्रीहिः । कार्य्याक्षमः । निष्कर्म्मा । कार्य्यानुपयुक्तः ॥ (क्रियामन्दः । कुकर्म्मा । स्वेच्छाचारी)

अकर्म्मान्वितः, त्रि, (कर्म्मणा अन्वितः न भवतीति । न + कर्म्मन् + अन्वितः ।) कुकर्म्मान्वितः । अकर्म्मविशिष्टः । दुष्कर्म्मयुक्तः ॥

अकल्कनः, त्रि, (नास्ति कल्कनं दम्भः यस्य सः । न + कल्कन ।) दम्भरहितः । तत्पर्य्यायः । दीन-